शास्त्री-II खण्ड साहित्य

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

Date __/__/____

मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरङ्गाधरदानदक्षः ।
अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदश सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः समुद्रस्य जलधारायाः वर्णनं करोति ।

भार्यासु असाधारणवृत्तिः तरङ्गाधर समर्पणेषु णोऽयं महोदधिः चुम्बनार्थं मुख कमल समर्पणेषु स्वभावधृष्टाः नदीः स्वयं चुम्बति ताश्च चुम्बनं कारयति अर्थात् - समुद्रे नदीनां मुखार्पणेन समुद्रस्य च नदीषु तरङ्गार्पणेन नदी समुद्रयोः नायकनायिकयोरिव चुम्बनं व्यवहारस्य समारोपोऽत्र वर्णित इति भावः ।

व्याख्या - अनन्यसामान्यकलत्रवृत्तिः = अनितरसाधारणसपत्नीव्यवहार तरङ्गाधरदानदक्षः = ऊर्म्योष्ठसमर्पणचतुरः । असौ = समुद्रः । मुखार्पणेषु = आननसमर्पणेषु, चुम्बनार्थम् । प्रकृतिप्रगल्भाः = स्वभावधृष्टाः । सिन्धूः = नदीः । स्वयम् = आत्मना । पिबति धयति, चुम्बति । पाययते = पानं कारयति, चुम्बनं कारयति

Renu Devi
22/09/20
राधा उमाकान्त सं० महावि० सुखसेना पूर्णिया ।

उपशास्त्री -II साहित्य तृतीयः पत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

प्रश्न (1) – संरुद्धचेष्टस्य मृगेन्द्र ! कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये ।।

उत्तरम् - प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके राजा दिलीपः सिंहम् प्रति कथयति –

व्याख्या – हे मृगेन्द्र = हे मृगराज ! संरुद्धचेष्टस्य = प्रतिबद्धभुजव्यापारस्य, मम तद्वचः = तद्वचनम्, कामं = नितरां, हास्यम् = उपहसनीयं स्यात्, यदहं = यद्वाक्यम, अहं = दिलीपः, विवक्षुः = वक्तुमिच्छामि । हि = यतः, भवान् = त्वं सिंहः, प्राणभृताम् = प्राणिनाम्, अन्तर्गतं = हृदयस्थमपि, सर्वं = निखिलं, भावं = अभिप्रायम्, वेद = जानाति, अतः = अस्माद्धेतोः, अभिधास्ये = वक्ष्यामि ।

भावार्थ – किमपि प्रतिकर्तुं सर्वथाऽसमर्थस्य मे वचनं कामं हास्यायैव स्यात्, तथापि सर्वज्ञस्य भवतः किमज्ञातमस्ति । अतोऽहं हृद्गतं किञ्चिद् वच्मि । यतो हि त्वं प्राणिनां हृदयगतं वाण्याऽप्रकाशितमपि जानासि एव । तस्माद् वक्तुमिष्टं स्वयं कथयिष्यामि ।

Renu Devi
22/09/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

उपशास्त्री-द्वितीय खण्ड  साहित्य  तृतीय- पत्रम

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

Date ___/___/___

पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी ।

[illegible]

तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपः वनपर्वतस्य सौन्दर्यस्य वर्णनं करोति —

निर्झरकणसम्पर्कात् शीतः पुष्पगन्धयुक्तयुक्तत्वात् सुगन्धः, आकम्पितत्वात् मन्दश्चेति त्रिविधो वायुः सदाचारसम्पन्नं धर्मार्तं राजानं दिलीपं सेवितवान् । 'आचारः प्रथमो धर्मः' इत्युक्तया सदाचारसम्पन्नः पुमान् सर्वेषां सेव्यो भवतीति जगत्पावनस्य पवनस्यापि स सेव्यो जातः ।

व्याख्या :- गिरिनिर्झराणां = अद्रिवारिप्रवाहाणाम्, तुषारैः = शीकरैः, सूक्ष्मैर्जलकणैः, पृक्तः = सम्पृक्तः अनोकहाकम्पितपुष्पगन्धी = ईषदान्दोलित कुसुमामोदशाली, पवनः = वायु, अनातपत्रं = व्रतपालनाय, छत्ररहितम्, अत एव आतपक्लान्तं = घर्म-पीड़ितम्, आचारपूतं = सदाचारपवित्रम्, तं = राजानम्, सिषेवे = सेवितवान ।

Renu Devi

22/09/20

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।

शास्त्री-I खण्ड साहित्य
अभिज्ञानशाकुन्तलम्

Date

प्र० (1) उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्या ।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥

उत्तरम् प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य तृतीयोऽङ्कात् उद्धृतोऽस्ति
अस्मिन् श्लोके राजा दुष्यन्तः निर्निमेषेण नेत्रेण शकुन्तलानुरागस्योचितत्वं समर्थयति -
पदानि = गीतिकापदानि, कवितापदानि, शब्दान् रचयन्त्या = विचारयन्त्या अस्याः = पुरःस्थितायाः शकुन्तलाया उन्नमिता एका भ्रूलता यस्मिन् तत् उन्नमितैकभ्रूलतम् = उत्क्षिप्तैक भ्रूकुटी मनोहरम् आननं = मुखम्, कण्टकितेन = रोमाञ्चितेन पुलकितेन, कपोलेन = गण्डस्थलेन मयि = दुष्यन्ते, अनुरागं = प्रेमबन्धं कथयति = सूचयति, अनुमापयति ।
सखीनियोगानुसारं सन्देशपत्रयोग्यानि पदानि रचयन्त्या मध्ये मध्ये एकां भ्रूलतामूर्ध्वमाक्षिप्य क्षणं तूष्णीं तिष्ठन्त्या अस्याः शकुन्तलाया रोमाञ्चितः कपोलो मद्विषये प्रगाढं प्रेमाणं द्योतयति ।

Renu devi
22/09/20
राधा उमाकांत सं० महावि० सुखसेना
पूर्णिया ।